श्री हरि स्तोत्रं (प्रह्लाद कृतं)

श्री हरि स्तोत्रं (प्रह्लाद कृतं)

त्रिभुवनभवनाभिरामकोशं
सकलकळंकहरं परं प्रकाशं |
अशरणशरणं शरण्यमीशं
हरिमजमच्युतमीश्वरं प्रपद्ये || 1 ||

कुवलयदलनीलसन्निकाशं
शरदमलांबरकोटरोपमानं |
भ्रमरतिमिरकज्जलांजनाभं
सरसिजचक्रगदाधरं प्रपद्ये || 2 ||

विमलमलिकलापकोमलांगं
सितजलपंकजकुड्मलाभशंखं |
श्रुतिरणितविरंचिचंचरीकं
स्वहृदयपद्मदलाश्रयं प्रपद्ये || 3 ||

सितनखगणतारकाविकीर्णं
स्मितधवलाननपीवरेंदुबिंबं |
हृदयमणिमरीचिजालगंगं
हरिशरदंबरमाततं प्रपद्ये || 4 ||

अविरलकृतसृष्टिसर्वलीनं
सततमजातमवर्धनं विशालं |
गुणशतजरठाभिजातदेहं
तरुदलशायिनमर्भकं प्रपद्ये || 5 ||

नवविकसितपद्मरेणुगौरं
स्फुटकमलावपुषा विभूषितांगं |
दिनशमसमयारुणांगरागं
कनकनिभांबरसुंदरं प्रपद्ये || 6 ||

दितिसुतनलिनीतुषारपातं
सुरनलिनीसततोदितार्कबिंबं |
कमलजनलिनीजलावपूरं
हृदि नलिनीनिलयं विभुं प्रपद्ये || 7 ||

त्रिभुवननलिनीसितारविंदं
तिमिरसमानविमोहदीपमग्र्यं |
स्फुटतरमजडं चिदात्मतत्त्वं
जगदखिलार्तिहरं हरिं प्रपद्ये || 8 ||

इति श्रीवासिष्ठमहारामायणे मोक्षोपायेषु उपशमप्रकरणे त्रयस्त्रिंशः सर्गे प्रह्लाद कृत श्री हरि स्तोत्रं